॥ अथ श्रीराघवेंद्रतीर्थकृत तिथिनिर्णय प्रारंभः ॥

श्रीगुरुभ्योनमः॥ स्मृत्यर्थसारंहेमाद्रिं माधवंनिर्णयामृतं ॥ वीक्ष्यनिर्णयसिंधुंच स्मृतिदर्पणमादरात्॥ १ ॥निर्णयोदन्वतःसार मुक्तोद्धारंकरोम्यहं ॥राघवेंद्रोविदांप्रीत्यै निर्णयोद्धार नामकं॥२॥तत्रतिथिर्द्वेधाशुद्धाविद्धाच तत्रशुद्धासंपूर्णत्वान्निर्णयानर्हा॥तिथ्यंतरयुताविद्धा वेधस्तुसायंप्रातस्त्रिमुहूर्तात्मकः॥कैश्चिद्द्विमुहूर्तोप्युक्तः ॥तत्रसौरमानंसमाश्रयेत् ॥ तिथि विशेषवेधःउपवासातिरिक्तः।तद्यथा।नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोष्टादशनाडीभि र्हंषयत्युत्तरांतिथिं॥ १ ॥स्वस्वकर्मकालव्यापिनीतिथिर्ग्राह्या॥ एकभक्तंमध्यान्हव्यापिनीतिथिर्ग्राह्या॥मध्यान्हःपंचधाविभक्तदिनतृतीयभागः॥उभयदिनव्याप्तावव्याप्तौवापरैव ॥ शुक्लप्रतिपदपराण्हव्यापिनीग्राह्या ॥ तदभावेसायान्हव्यापिनीग्राह्येतिमाधवः॥कृष्णप्रतिपत्परा द्वितीयातकृष्णापूर्वा॥शुक्लोत्तरेतिहेमाद्रिः॥तृतीयातुरंभातिरिक्तासर्वापरैव॥गौरीव्रतेशुद्धामपिपूर्वांत्यत्कामुहूर्तमात्रापिपरैवग्राह्येतिमाधवादयः॥ चतुर्थ्यपिगणेशव्रतातिरिक्तासर्वापिपरैव॥गणेशव्रतेतृतीयायुतामध्यान्हव्यापिनीग्राह्या॥अन्य

थापरेतिमाधवः॥ गौरीचतुर्थीव्रतेतदिनद्वयेमध्यान्हव्याप्तावपिपूर्वैव पंचमीतुकृष्णापूर्वा शुक्लोत्तरेतिहेमाद्रिः॥सर्वापिपूर्वैवेतिमाधवः॥नागव्रतेपरा अन्यथापूर्वैवेतिनिर्णयसिंधुः॥ षष्टीस्कंदव्रतातिरिक्तासर्वापरैव ॥ सप्तमीसर्वापिसर्वमतेपूर्वैव ॥ अष्टमीतुकृष्णापूर्वाशुक्लोत्तरेतिमाधवः॥शिवशक्त्युत्सवेकृष्णापिसापरैव नवमीसर्वापिसर्वमतेपूर्वैव॥दशमी तुकृष्णापूर्वा॥शुक्लोत्तरेतिमाधवः॥कमलाकरस्तुद्वेपिनवमीत्युक्तेत्याह ॥ नवमीयुतासंभवेऔदयकीग्राह्येतिनिर्णयामृतः॥अथैकादशीनिर्णयः॥सात्रिधाशुद्धाविद्धाच॥तत्रशुद्धासमन्यूनाधिकभेदेनत्रिधाइयमपिद्वादश्यूनसमाधिकपक्षेणप्रत्येकंत्रिधा॥एवंनवभेदाःविद्धायाअप्येवमेवअष्टादशभेदाः॥यथा॥शुद्धसमद्वादशीसमा॥ १ ॥शुद्धसमद्वादश्यूना॥ २ ॥ शुद्धसमद्वादश्यधिका॥ ३॥शुद्धन्यूनसमद्वादाशिका॥४॥शुद्धन्यूनन्यूनद्वादशिका॥ ५॥शुद्धन्यूनाधिकद्वादशिका॥ ६॥शुद्धाधिकसमद्वादाशिका॥७॥शुद्धाधिकन्यूनद्वादाशिका ॥८॥शुद्धाधिकाधिकद्वादाशिका॥ ९॥विद्धसमसमद्वादशिका॥१ ०॥विद्धसमन्यूनद्वादशिका॥१ १॥

विद्धसमाधिकद्वादशिका॥१२॥विद्धन्यूनसमद्वादशिका॥१३॥विद्धन्यूनन्यूनद्वादशिका॥
॥१४॥विद्धन्यूनाधिकद्वादशिका॥१५॥विद्धाधिकसमद्वादशिका॥१६॥विद्धाधिकन्यूनद्वा
दशिका॥१७॥विद्धाधिकाधिकद्वादशिका॥१८॥तत्राद्यौवैष्णवनिर्णयःसूर्योदयात्पूर्वंतुमुहूर्त्तद्व
याधिकंप्राविष्टैकादशीशुद्धा॥षट्पंचाशत्॥५६॥घटिकानंतरंकलयापिदशमीप्रवेशेविद्धा-
विद्धात्याज्यैव शुद्धाभेदेषुतृतीयषट्सप्ताष्टनवमपक्षेषुपरैवोपोष्या॥अन्येषुपूर्वैवेतिमाध
वकमलाकरौ॥७॥अथस्मार्तनिर्णयः॥तत्रसूर्योदयेदशमीसद्भावेविद्धान्यथाशुद्धा॥शुद्धाभे
देषुविद्धसमादिषट्पक्षेषुचपूर्वैवोपोष्येतिमाधवनिर्णयामृतकमलाकरादिबहुमतं।तृतीया
षट्पक्षयोसर्वैरप्युत्तराग्राह्येतिहेमाद्रिः।एतद्वैष्णवपरमितिकमलाकरः।सप्ताष्टमभेदयोःगृ
हस्थैःसकामैश्चपूर्वा॥यतिवनस्थविधवाभिरुत्तरा॥अष्टमभेदेविष्णुप्रीतिकामैरुपवासद्वयं-
कार्यमितिहेमाद्रिकमलाकरौ॥नवमभेदेतुसर्वेषांपरैव॥त्रयोदशीमाधवनिर्णयामृतेसर्वेषां-
पूर्वैव॥कमलाकरस्तुमुमुक्षूणांपुत्रवतांपरा॥अन्येषांपूर्वैवेत्याह॥चतुर्दशीपक्षेतुपूर्वैव॥कम-

लाकस्तुमुमुक्षणांपरा॥अन्येषांपूर्वैवेतिमदनरत्ने॥पंचदशपक्षेहेमाद्रिमाधवमतेपरा॥निर्णयामृतमदनरत्नमतेपूर्वा॥षोडशपक्षसर्वेषांपूर्वैवेतिकमलाकरः॥निर्णयामृतेपरा माधवमतेगृहस्थैःयतिविधवावनस्थैःपूर्वैवोपोष्या॥सप्तदशपक्षेमोक्षपापक्षयाविष्णुप्रीतिकामैर्यतिवनस्थविधवाभिःपरागृहस्थैःपूर्वैवगृहस्थैर्नक्तंकार्यामितिकमलाकरःअष्टादशपक्षेसर्वेषांपरैवाविधिसंदेहेज्योतिर्निबंधप्रतिपत्तौवापरेतिकेचित्तद्वैष्णवमितिकमलाकरःएकादश्यांपित्रोःश्राद्धेसतितत्कृत्वापितृयज्ञशेषमाजिघ्रेदितिहेमाद्रिमाधवादयःद्वादशीयदाअल्पातदामाध्यान्हकीक्रियामपकृष्यकृत्वाप्रातरेवपारणंकार्यमितिदेवलः॥संकटेश्राद्धप्रदोषव्रतादौजलेनपारणंकुर्यादितिचद्वादश्याःप्रथमःपादःहरिवासरसंज्ञस्तंवर्जयेत्एकादशीद्वादशीपक्षद्वयेपिपूर्वैवपक्षद्वयेष्युपवासेपरेतिमदनरत्ने॥शिवरात्रिव्रतसायंपूजादानपितृदेवप्रीत्यर्थोपवासादौपरेतिग्राह्या॥श्राद्धेमासाग्निकौस्त्रिधाविभक्तगतिःदिनस्यतृतीयभागात्परोपराण्हस्तद्व्याप्तिनीग्राह्या॥दिनद्वयेतत्सत्वेसर्वापराण्हाग्राह्या॥दिनद्वयेअपराण्हव्याप्त्य

भावेअंशोनव्याप्तौचतिथिपक्षेपूर्वैवेतिहेमाद्रिः॥ दिनद्वयेअपराण्हव्याप्त्यादौत्रिमुहूर्ताचेत्पूर्वा॥ निरग्निकस्यतुकुतपकालव्यापिनीग्राह्या॥ अपराण्हव्यापिनीसर्वेषांमुख्या॥ तिथिसाम्येतिथिवृद्धौचपरा॥ तिथिक्षयेपूर्वातिथिसाम्येपरादिनद्वयेपराण्हस्पर्शेकुतपकालव्यापिनीग्राह्येतिमाधवः॥ दिनद्वयेकुतुपकालव्याप्तौपरा॥ कुतुपस्तुपंचधाविभक्तदिनस्याष्टमोभागइतिमाधवस्मृत्यर्थसारादयःदिनद्वयेअपराण्हव्याप्त्यादौत्रिमुहूर्ताचेत्पूर्वा॥ निरग्निकैस्तुकुतुपकालव्यापिनीग्राह्या॥ यागकालस्तुपर्वणश्चतुर्भागः॥ प्रतिपदाद्यभागत्रयंच॥ तत्रमध्यान्हेतत्पूर्ववाप्रतिपदासंधौतदहर्यागः॥ अत्रान्होद्वेधाविभागः॥ मध्यान्हादूर्ध्वंसंधौपरेह्नियागइतिमाधवः॥ हेमाद्रिमतेपरदिनेप्रतिपच्चतुर्थचरणेसतिद्वितीयासुक्षयगतासुपूर्वेह्नियागः॥ अन्यथापरस्मिन्चंद्रोदयदिनेयोगोनिषिद्धः॥ अपराण्हसंधौचतुर्थचरणेयागइतिमाधवः॥ एतत्पौर्णिमापरमितिकमलाकरःसंगवादूर्ध्वंमध्यान्हात्प्राक्यदासंधिः॥ सापौर्णमासीसंस्कारविधाअमायांविशेषः॥ प्रतिपदिसायंद्वितीयायास्त्रिमुहूर्तस्पर्शेचतुर्दश्यामनि०

न्वाधानं॥वाजसनेयिनांसंधिदिनेऽन्वाधानंपराण्हेयागइतिमाधवः॥तैत्तरीयाणांचंद्रदर्शने यागः॥एवंनिरग्निकानांस्मार्तस्थालीपाकेपिपिंडपितृयज्ञस्तुकात्यायनानां॥यागदिनात्पू र्वदिने॥आश्वलायनानांशेषपर्वणिखंडतिथौ॥तदापूर्वदिनेऽन्वाधानंकेवलश्राद्धंविहायापरेद्युःपर्वांतेस्थालीपाकंकृत्वाऽपराण्हेपिंडपितृयज्ञःकार्यइतिदिक्॥इत्यमावास्या॥अथग्रहणनिर्णयः॥तत्रसूर्यग्रहणं यस्मिन्यामेतस्मात्पूर्वयामत्रयंनिषिद्धं चंद्रग्रस्तोदयेदिनेवानाश्नीयादितिमाधवः॥ग्रस्तास्तेतुमुक्तिंदृष्टवानश्नीयात्॥सूर्यग्रस्तास्तेतुपवासःपुत्रवान्ग्रहणप्रहरात्प्राक्प्रहरद्वयंहित्वाऽधान्नोपवसेदितिहेमाद्रिःपुत्रवानपिनाश्नीयादितिमाधवस्तुद्युक्तोत्तरं॥यद्वाकृष्णैकादशीवत्पुत्रवान्॥किंचिद्रक्षंप्रकल्पयेन्नैवभुंज्यादितिमयूखे॥नीलकंठः॥ग्रहणांतंग्रहणदिनेवाउपवासोमहाफलः॥ग्रस्यमानेस्नानंग्रस्तेहोमोमुच्यमानेदानंमुक्तेस्नानंच॥रजश्वलाप्युधृतवारिणास्नायादितिविज्ञानेश्वरः॥अत्रवृद्धिक्षयाशौचेपिस्नात्वाश्राद्धादिकुर्यादितिमाधवकमलाकरौ॥तद्दिनेप्रत्याब्दिकेसतितद्दास्यमानान्नेनामेनवा

कुर्यात्॥७॥इतिग्रहणनिर्णयः॥अथसंक्रांतिनिर्णयः॥मेषसंक्रमेप्रत्यगूर्ध्वंदश॥१०॥नाड्यः
वृषेपूर्वाःषोडश१६मिथुनेपराःषोडश१६कर्केपूर्वास्त्रिंशत्३०सिंहेपराःषोडश१६कन्यायां
पराःषोडश१६तुलायांप्रागूर्ध्वंदश१०वृश्चिकेपूर्वाःषोडश॥१६॥धनुषिपराःषोडश॥१६॥मक
रेहेमाद्रिमतेपराश्चत्वारिंशत्॥४०॥परेवामाधवमतेविंशतो॥२०॥कुंभेपूर्वाःषोडश॥१६॥
मीनेपराःषोडश॥१६॥इतिदिनसंक्रांतौ॥सायंसंक्रांतौतुयत्रोत्तरः॥पुण्यकालस्तत्रापितावन्मितःपूर्वमेवयत्रप्रणुक्तःतत्रतावन्मितःपरतोदयानंतरमेव॥निशीथादर्वाक्तदापूर्वदिनमेवपुण्यं॥अनंतरंचेत्तदापरदिनएव॥निशीथएवचेत्तदादिनद्वयंपुण्यं॥रात्रौप्रदोषेनिशीथेवामकरसंक्रांतौमाधवमतेद्वितीयदिनइतिपुण्यंहेमाद्रिस्मृत्यर्थसारमते॥निशीथात्पूर्वंपश्चाच्चसंक्रांतौदिनांतेदिनोदयेक्रमेणपंचपंचनाड्यःपुण्याःनिर्णयसिंधौतुप्रदोषेधरात्रेवा-
मकरसंक्रांतौदिनांतेपूर्वदिनेचपंचनाड्यःपुण्याः॥एतत्पुण्यातिशयद्योतनार्थमितिकर्कसं-
क्रांतौदिनांतेपूर्वदिनेचपंचनाड्यःपुण्याःएतत्पुण्यातिशयद्योतनार्थमितिविरोधःपरिहृतः

इतिसंक्रांतिनिर्णयः ॥अथमासक्रमेणविशेषतिथयोनिर्णीयंते ॥७॥चैत्रसितप्रतिपदुदय-व्यापिनीग्राह्या॥दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वैव॥चैत्रनवरात्रौतुद्वितीययुतैवग्रा ह्या ॥नित्योत्रतैलाभ्यंगःप्रपादानंच ॥ शुक्लतृतीयागौरीव्रतेमुहूर्तमात्रापिपरैवग्राह्याइयंम न्वादिरपि ॥मन्वादयःसिताःसर्वाःपूर्वाण्हिकास्युः ॥कृत्वाअपराण्हिकाइतिहेमाद्रिः ॥शु-क्लनवमीरामनवमी॥इयंमध्यान्हव्यापिनीग्राह्या॥ दिनद्वयेतत्सत्वेतदभावेवापुनर्वसुयु तामपिपूर्वेत्यत्कासर्वमतेपरैवग्राह्या ॥ शुक्लचतुर्दशीकुलधर्मदमनार्पणादौपूर्वैवसायं--कालव्यापिनीग्राह्येतिमाधवःपूर्वदिनेसायंत्रिमुहूर्तवेधभावेतिकमलाकरःपौर्णमासीतुपरै व॥इतिचैत्रः॥अथवैशाखः॥वैशाखशुक्लतृतीयापूर्वाण्हव्यापिनीग्राह्या॥दिनद्वयतद्व्याप्तौ परैव ॥गौरीव्रतेमुहूर्तमात्रापिपरैव ॥इयंयुगादिरपि ॥माघेपंचदशीकृष्णनभस्येचचतुर्दशी ॥तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयः॥इतिपूर्वाण्हग्राह्या ॥उदयव्यापिन्यइतिस्मृत्यर्थ-सारः॥दिनद्वयेतद्व्याप्तौपरैवेतिहेमाद्रिःनिर्णयामृतकालादर्शादौश्राद्धवदपाराण्हःइत्या

हतुः॥तदिदानींतनाःनेच्छंतिइयंपरशुरामजयंति॥साप्रदोषव्यापिनीग्राह्या॥दिनद्वयेतद्व्याप्तावपरैव॥शुक्लचतुर्दशीनृसिंहजयंति॥इयंप्रदोषव्यापिनीग्राह्या॥दिनद्वयेतद्व्याप्तावंशतःसमव्याप्तौचपरा॥इतिवैशाखः॥अथज्येष्ठं ज्येष्ठीपौर्णिमासावित्रीव्रतेपूर्वविद्धाग्राह्या॥अष्टादशघटिकामितायदाचतुर्दशीतदासावित्रीव्रतेपरेतिमाधवः।कमलाकरस्तुनैतत्सहमानःपूर्वैवेत्याहइतिज्येष्ठं॥ अथाषाढः आषाढशुक्लैकादश्यांचातुर्मास्यव्रतारंभःकार्यः॥ शुक्लद्वादश्यामनुराधायाःगतैष्ययोगेनत्रिभागकृतेप्रथमभागयोगरहितायांपारणं कार्यं॥अस्यामेवविष्णोःशयनोत्सवंकार्यंआषाढपौर्णिमायां॥ व्यासपूजायांत्रिमुहूर्तांचेत्परैव॥इत्याषाढः।अथश्रावणं श्रावणशुक्लचतुर्थ्यामविवाहितकुमारीभिश्चैकविंशतिग्रंथियुतःसूत्ररूपोगणेशःपूज्यइतिसांप्रदायिकाः॥इयंचतुर्थीमध्यान्हव्यापिनी॥तदभावेत्रिमुहूर्तांचेत्परा॥नागचतुर्थीमध्यान्हव्यापिन्येवोपोष्या॥दिनद्वयेतथात्वेतदभावेवापरैवापंचमीनागपूजादौत्रिमुहूर्तांचेत्पराअन्यथापूर्वैवश्रावणशुक्लचतुर्दशीकुलधर्मपवित्रार्पणादौ-

पूर्वैवसायंकालव्यापिनीग्राह्येतिमाधवः।अत्रैवश्रवणर्क्षेउपाकर्मकुर्यात्॥दिनद्वयेऋक्षयो
गेसतिधनिष्टायुक्तःश्रवणोग्राह्यः ॥ उत्तराषाढयुक्तोनिषित्थःपूर्वेद्युरुत्तराआषाढयोगेपरेद्यु
रेवश्रवणाभावेघटिकाद्वयन्यूनेवाहस्तसंयुक्तपंचम्यादौकार्यं तथैवसंक्रांतिग्रहणगुरुशु-
क्रास्तादावधिमासेपिनकार्यंयद्वाग्रहणसंक्रांतिगुरुशुक्रास्तादौनतनानामेवपंचम्यादाव
न्येषांतदैवश्रवणादौतत्राप्यर्धरात्रोत्तरंग्रहणादौश्रवणयुतएवकार्यं।तैतरीय्याउदयव्यापि
न्यांपौर्णमास्यांकुर्युः ॥ कात्यायनानांतुदिनद्वयेपूर्वाण्हव्याप्तावेकदशस्पर्शेवा॥ पूर्वैवेति-
हेमाद्रिः॥निर्णयामृतस्तुयजुःशाखिनामौदयिकपरेत्युक्तवान्। रामकौतुकेतु पूर्वाग्राह्येत्यु
क्तं॥नूतनब्रह्मचारिणामत्रवृद्धिश्राद्धमुक्तंवृत्तिकृत॥ब्रह्मचारिणामन्येषांवायथाधिकारव
पनमुक्तमत्रश्रावणीपौर्णमासीपवित्रार्पणकुलधर्मादीपूर्वैवअस्यामभ्यंगोनित्यःअस्यामे-
वभद्ररहितायांरक्षाबंधनंकार्यं॥श्रवणकर्मण्यस्तमययोगिनीग्राह्या ॥खंडशेषपर्वणीवाकु
र्यात्॥श्रावणकृष्णचतुर्थीवार्षिकसंकष्टचतुर्थीगणेशप्रादुर्भावदिनंचतत्॥साचंद्रोदयव्या-

पिनीग्राह्या।दिनद्वयेचंद्रोदयसत्वेपूर्ववा।असत्वेकर्मोपक्रमकालेव्याप्तिसत्वात्॥ परेवेति
माधवकमलाकरौश्रावणकृष्णाष्टम्यामर्धरात्रव्यापिनीग्राह्या॥उभयेद्युर्निशीथयोगेतदभा
वेवापरैवारोहिणीयोगेनेयंचतुर्धा॥ पूर्वेद्युरेवनिशीथेष्टमीरोहिणीयुताचेदपिपरैव॥यदातुपू
र्वेद्युरेवनिशीथेष्टमीपरेद्युर्निशीथेरोहिणीतदामाधवमतेपरा॥हेमाद्रिःपूर्वा॥कालतत्वविवे-
चनादयोनाव्यापिपूर्वामिछंति॥तदाकमलाकरस्तुउपवासद्वयमवदत्यदातपूर्वेन्हिनि
शीथेरोहिण्यष्टमीनिशीथेतदाउभयदिनेऽष्टमीरोहिण्योःनिशीथेसंभवेसर्वमतेपरैव॥इयंबु
धसोमयुताअतिप्रशस्तेतिमाधवः।संभवेतिथ्यक्षछेदेपारणंकुर्यात्॥यदारात्रौतुसार्धप्रहरो
त्तरनक्षत्रांतस्तदोपवासएवा॥श्रावण्यमायांकुशग्रहणंकुर्यात्इतिश्रावणः॥अथभाद्रपदः
भाद्रपदशुक्लतृतीयाहरितालिकाव्रतेसंपूर्णामापिपूर्वात्यत्कामुहूर्तमात्रापिपरैवग्राह्यातिमा
धवःभाद्रशुक्लचतुर्थीवरदाव्यासामध्यान्हव्यापिनीग्राह्यादिनद्वयेतथात्वेपूर्वादिनद्व-
येतदभावेपरैवेतिमाधवःसिद्धिविनायकव्रतेप्ययंनिर्णयःभाद्रशुक्लपंचमीऋषिपंचमीइ-

र्यंमध्यान्हव्यापिनीग्राह्येतिमाधवीयेहारीतः॥दिनद्वयेतथात्वेपरेतिहेमाद्रिःदिनद्वयेम
ध्यान्हव्याप्तौवापूर्वेतिमाधवः॥ऋष्युदयेपूजाविधानाद्रात्रियोगिनोनग्राह्येतिरामकौतुके
॥भाद्रशुक्लाष्टमीदूर्वाख्यासातुपूर्वैव॥इयमेवज्येष्ठापूजनेज्येष्ठायोगवशेनपूर्वावापरावाग्रा
ह्या॥दिनद्वययोगेपरा॥प्रतिवार्षिकज्येष्ठाव्रतमष्टम्यामेवकार्यं।परंतुदाक्षिणात्यास्तुऋक्षए-
वपूजनंकुर्वंति॥अष्टवानुवाराष्टमीजेष्ठर्क्षयोगेतिप्रशस्थइतिमाधवः॥भाद्रशुक्लद्वादश्यांश्र-
वणमध्यपादयोगरहितायांपारणंकार्यंएकादश्याःश्रवणयुतद्वादशीयोगेविष्णुशृंखळयोग
इतिहेमाद्रिः निर्णयामृततुश्रवणस्यैकादशीद्वादश्योर्योगएवनान्यथेति।निशीथानंतरम-
र्कोदयावधिकलामात्रमपिविष्णवर्क्षंभवतितदापूर्वैवाउदयव्यापिनीग्राह्येतिस्मृत्यर्थसारः
दिनद्वयेउदययोगेपूर्वैव॥यदैकादश्यामेवश्रवणंनद्वादश्यांतदापिपूर्वैव ॥ यदाद्वादश्येवर्क्ष-
युतातदापिपरा।कमलाकरस्तुपवासद्वयमवदत्।हेमाद्रिस्तुपूर्वामेकादशींत्यत्काद्वादश्ये
वोपोष्येत्याह॥ भाद्रशुक्लचतुर्दश्यनंतव्रतेत्रिमुहूर्ताप्योदयकीगाह्येतिमाधवः ॥ घटिकामा

त्राप्यौदयिकीग्राह्येतिनिर्णयामृतः॥दिनद्वयेतथात्वेपूर्वा॥भाद्रपौर्णमास्यांप्रपितामहा-
त्परान्त्रीनुद्दिश्यनांदीमुखसंज्ञकंश्राद्धंकार्यअत्रमातामहानांतुकृताकृतं।अथापरपक्षः।त
त्रापिपूर्णपक्षकालःपंचम्यादिषुप्रशस्थः॥तत्रापिदशम्यादितत्रापिमघात्रयोदशी।दरिद्रस्य
सकृन्महालयः॥ तत्रप्रतिपदादिदर्शांतपक्षेनंदादिकंवर्जं॥तदाहकार्ष्णाजनिः॥ नभस्य
स्यापरेपक्षेश्राद्धंकुर्याद्दिनेदिने नैवनंदादिवर्जंस्यान्नवनिंद्याचतुर्दशीति।यत्तुप्रतिपदप्रभृति
ष्वेकांवर्जइत्वाचतुर्दशीमितियाज्ञवल्क्यवचनमयुक्तं कृष्णतृतीयायांबृहद्गौरीव्रतेतृतीया
याःप्राधान्यात्संपूर्णातृतीयैवप्रशस्थेतिहेमाद्रिः॥एकवार्षिकव्रतत्वात्नक्षत्राद्यपेक्षानप्रश
स्थेतिअत्रेयः॥नवैधृतानपातेचगुरुभार्गवमूढयोः॥नाधिमासेतिकर्तव्यमन्यत्रनविचारये
दितिवृद्धमनुः॥अत्रिवचनंमासांतरेसावकाशतयाव्यवहर्तव्यं॥ तथापिचतुर्दश्यामपिंडकं
युक्तंकन्यागतेसवितरिदिनानिदशपंच चायान्यहानितुषोडशसाम्येपंचदश्येकःकल्पःआ
श्वयुक्शुक्लप्रतिपदासहेतिद्वितीयः॥हेमाद्रेःपूर्वयापौर्णमास्ययासहेतितृतीयः।अत्रपक्ष

द्वयंभिन्नानामेककर्मणांप्रतिदिनभिन्नाएवप्रयोगाइत्येकःपक्षः ॥एवमेवश्राद्धंप्रतिदिनमा
वर्ततइत्यपरः॥आद्येतुप्रतिदिनंदक्षिणादेया॥अथाश्विनः॥तत्रप्रतिपन्मातामहश्राद्धेपरा-
ह्णव्यापिन्येवग्राह्या॥संगवव्यापित्वंतुछं॥इदंश्राद्धंजीवत्पितृकस्यपिंडरहितं॥युक्तंप्रतिभा
ति॥अत्रैवनवरात्रारंभःकार्यः ॥ अत्रदोषद्विमुहूर्तामुहूर्तमात्रापिपरैव ॥ अमायुक्तानिषि-
द्धा॥उभयदिनेउभयव्यापिनीपूर्वा॥परदिनेप्रतिपदत्यंतासत्वेअमायुक्तापिपूर्वाप्रतिपदः
पूर्वाःषोडशनाड्योनिषिद्धः ॥ अत्रचित्रावैधृत्यादिनिषेधश्चित्याइतिनीलकंठः॥क्वचित्स-
मूलत्वेसंभवेयोज्यावा॥असंभवेतेभ्यःप्रथमांघ्रिवर्जः ॥ वृद्धामुहूर्तमात्राधिकासर्वदोषयुता
पिद्वितीययुतैवकार्या ॥ कलशस्थापनंतुदिवैव नवरात्रौइदमारब्धंमृतसूतकेपिग्राह्यं॥अ
नारब्धेपूजाद्यन्येनकारयेत् ॥ पूर्वारंभस्तुनभवत्येव ॥ शुक्लपंचमीललितात्रेतपूर्वविद्धारा-
त्रिव्यापिनीग्राह्येत्युक्तवतः॥अत्रैवमूलाद्यपादपुस्तकपूजाश्रवणाद्यांतेवाविसर्जनं॥अत्रै
वनवरात्राशक्तौतुसप्तम्यादिरात्रंवाकुर्यादितिहेमाद्रिःतत्रसप्तम्युदयेघटीमात्राचेत्परान्य

थापूर्वैवेतिनिर्णयसिंधुदेवलादयोन्येतिबंधाश्चायुग्मवाक्याननात्रानियामकं॥ आश्विनशु-
क्लाष्टमी३घटिमात्राप्यौदयिकीग्राह्या ॥ कलामात्रापिसप्तमीविद्धानिषिद्धापरदिनेष्टम्य-
भावेसप्तमीयुतापिग्राह्या ॥ पुत्रवतेकरात्रपक्षेऽष्टम्यामुपवासोनकार्यः॥नवम्यष्टम्युताग्रा-
ह्या॥अष्टमीनवमीयुक्तनवमीचाष्टमीयुतेतित्युग्मवाक्यात्इयंत्रिमुहूर्तवेधाभावेनिषिद्धा
पिबलिपूजनेपराहोमादितुनवम्यामेवकार्या॥आचारात्संधौकुर्वंति॥पुत्रवतैकरात्रपक्षेनवं-
म्यामुपोषणंकर्तव्यं॥पारणंनवम्यांकार्यमितिनिर्णयदीपः॥तत्तुछागमितिकमलाकरनीलकं-
ठौ॥तल्लोहाभिसारिकव्रतंनृपविषयमितिकमलाकरःदशम्यामेवपारणंकार्यमितिहेमाद्रिः
कमलाकरनीलकंठादयः ॥ पारणाहेमृतजातकसूतकप्राप्तेहोमादिब्राह्मणद्वाराकारइ-
त्वापारणंकुर्यादेव॥सूतकांतेब्राह्मणभोजनंदक्षिणदानादिकार्यं सधवाविधवास्त्रीभिरपिर-
जोदर्शनमध्येपारणंकार्यमेव॥विजयदशमीप्रदोषव्यापिनीग्राह्या॥दिनद्वयेपराण्हव्यापि
नीत्वेपूर्वापरदिनेपराण्हश्रवणस्पर्शेपरैव॥अश्विजपौर्णमास्यामाश्वयुजोकर्मकार्यं ॥ तत्र

पूर्वाण्हव्यापिनीग्राह्या ॥ कौमुदीमहोत्सवेपरैव ॥ आश्विनकृष्णद्वादशीगोवत्ससंज्ञासा-
प्रदोषव्यापिनीग्राह्या॥दिनद्वयेतथात्वेतुपूर्वैव॥आश्विनकृष्णचतुर्दशीनरकचतुर्दशी नर
कचतुर्दशीतैलाभ्यंगेचंद्रोदयव्यापिनीग्राह्या॥दिनद्वयेचंद्रोदयचतुर्दशीसत्वेतदभावेवा
अरुणोदयेसंपूर्णैवादिनद्वयेतदापूर्वाउभयेद्युः अरुणोदयव्याप्त्यभावे चतुर्दशीन्हासेपूर्वै
व॥प्रवेश्यत्रयोदशीमध्यएवाभ्यंगंकुर्याद्दिवोदासः॥तथा॥त्रयोदशीयदाप्राप्तःक्षयंयातिच
तुर्दशी॥रात्रिशेषेत्वमावास्यातदाभ्यंगेत्रयोदशीतिचंद्रप्रकाशोक्तेश्च। अमृतजीवात्पितृकै
र्यमभीष्मतर्पणंचकर्तव्यंतत्रापसव्येनसव्येनवा॥आश्विन्यमायांप्रातरभ्यंगंकुर्यात्प्रदो-
षेदीपान्दद्यात्॥इत्याश्विनः ॥ छ ॥ अथकार्तीकः॥कार्तीकशुक्लप्रतिपद्बलिपूजनेपूर्ववि-
द्धाग्राह्या ॥ गौक्रीडादौसायान्हव्यापिनीदिनद्वयेतथात्वेपूर्वैवचंद्रोदयनिषेधाद्यत्रचंद्रो
दयःस्नानग्राह्या ॥ नारीभिर्नीराजनमंगलमालिकेतुघटिकामात्रयार्मापि द्वितीयायुता
प्रतिपदीकार्या मुहूर्तमात्रापिसाविद्धानिषिद्धाप्रतिपदितैलाभ्यंगोनित्योद्यूतक्रीडाच का-

र्तीकशुक्लद्वितीयायमद्वितीया॥साप्रतिपद्युताग्राह्येतिनिर्णयामृतः॥माध्यान्हव्याह्येति हेमाद्रिःउभयेकमध्यान्हव्याप्तावव्याप्तौवाअपराण्हव्यापिनीग्राह्येतिरामकौतुकनील-कंठौ ॥ अस्यांभगिनीहस्तादेवभोक्तव्यानेतरत्रा ॥भगिन्यसन्निहितं॥अभावेचकल्पितभ गिनीहस्तादेवभोक्तव्यं॥नेतरत्राभगिन्यसन्निहिते॥अभावेचकाल्पितभगिनीहस्तादेवभो-क्तव्यमितिहेमाद्रिः॥कार्तीकशुक्लैकादश्यारभ्यभीष्मपंचकंकुर्यात्अत्रैवद्वादश्यांरेवत्यं-त्यचरणसन्निहितायांपारणंकार्यअत्रैवसायंदेवोत्थापनमहोत्सवः ॥कार्यइतिहेमाद्रिः॥शु क्लचतुर्दशीवैकुंठाख्यासानिशीथव्यापिनीग्राह्या॥निनद्वयेनिशीथव्याप्तौप्रदोषनिशीथो भयव्यापिन्येव॥विश्वेश्वरप्रतिष्टादिनत्वादयंचतुर्दशीअरुणोदयव्यापिनी॥अत्रैवकार्तिको द्यापनंकार्यं॥चतुर्दश्यांपौर्णिमास्यांमिथुनब्राह्मणभोजनंमहादानादिकर्तव्यं तथात्रपौर्णि मात्रिपुरोत्सवेसायान्हव्यापिनीग्राह्य॥कार्तिककृष्णाष्टमीकालाष्टमी॥सबहुरात्रव्यापि-नीग्राह्या ॥ दिनद्वयेअंशतोरात्रिव्याप्ताउत्तरैव ॥ इतिकार्तीकः॥अथमार्गशीर्षः ॥ मा-

र्गशीर्षपंचमीनागव्रतेत्रिमुहूर्तावेत्परा ॥ अन्यथापूर्वैव ॥ अत्रैवशुक्लाष्टमीचंपाख्यांइयमुत्त
रां॥शततारारविवारयोगवशात्पूर्वापराग्राह्यापौर्णमास्यात्रप्रत्यवरोहणेअस्तमयोगिनीग्रा
ह्या॥इतिमार्गशीर्षः॥अथपौषः।पौषीपौर्णमाशित्रिमुहूर्तावेत्पराव्रतादौकुलधर्मादौपूर्वावे
तिपौष्यः॥अथमाघः॥माघशुक्लसप्तमीरथसप्तमीसाअरुणोदयव्यापिनीग्राह्या ॥ दिनद्व
येतद्व्याप्तावव्याप्तौवापूर्वैवअत्रैवाष्टम्यांभीष्मतर्पणमुक्तंतत्तुजीवत्पितृकैर्यज्ञोपवीति-
नैवकर्तव्यं।पुत्रकामस्तुश्राद्धंकुर्यात्।माघकृष्णचतुर्दशीशिवरात्रिःतत्रप्रदोषव्यापित्वंनि
शीथव्यापित्वंचप्रयोजकं ॥ निशीथश्चद्वितीययामांततृतीययामादिमध्यवतीघटिद्वय-
मितिमाधवः।अस्तानंतरंत्रिमुहूर्तःप्रदोषःपूर्वेपरेवोभयव्याप्तौपूर्वैव।उभयेकानिशीथव्या
प्तौपूर्वैवेतिहेमाद्रिमदनरत्नौपरैवेतिमाधवनिर्णयामृतौपरेद्युःअर्धरात्रैकदेशव्याप्तौपूर्वेद्युः
संपूर्णतद्व्याप्तौपूर्वैवपरेद्युर्निशीथव्याप्तौपरेद्युरर्वाङ्निवृत्तौ तदाप्रदोषव्याप्तित्वात्परा-
दिनद्वयेप्रदोषव्याप्तौपूर्वैवनिर्णयामृतस्तुपरेत्याह।पारणातुचतुर्दशीमध्यएवकार्या यामत्रा

याधिक्यतुसुतरांतिथिमध्यएव॥इतिमाघः॥अथफाल्गुणः॥फाल्गुणपौर्णिमाहोळिकापू-
जार्थंसापराण्हव्यापिनीग्राह्या॥प्रदोषव्यापिनीसापूर्वविद्धा॥दिनद्वयेप्रदोषव्याप्तौपरैवतद
भावेपिपरैवेतिनिर्णयामृतः॥पूर्वदिनेभद्रायाःसत्वात्॥अन्येतुभद्रामुखमात्रंत्यत्कापूर्वादिन
एवहोळिकाकार्येत्याहुः॥ वस्तुतोयदापूर्वेद्युःसंपूर्णरात्रौभद्ररहितःकालोनप्राप्यते॥परेद्यु
श्चप्रदोषेपौर्णिमाभावस्तदाभद्रामुखमात्रंत्यत्काभद्रापुछेकार्येतिसर्ववचनानामाशयः॥नी
लकंठाशयोपिप्येवं॥ यदातुरात्रौसार्धप्रहरोत्तरंहोळिकातदातुतद्दिनेभुत्कारात्रौदीपनसम
येस्यात्वाहोळिकांसंपूज्यप्रातःसुवाशिन्यादिभोजयेदितिकृतकृत्यत्वात्॥ यदातुसंपूर्णापूर्व
रात्रौभद्रयाव्याप्ताउत्तरदिनेप्रदोषेचेच्चंद्रग्रहणंतदाग्रहणस्नानोत्तरमेवहोलिकांपूजयेत्॥न
तुपूर्वेद्युर्विष्टिपुछइतिकमलाकरनीलकंठावाहतुःकृष्णप्रतिपदिश्वपचंस्पृष्ट्वास्नायादिति-
निर्णयसिंधुःतद्दिनेप्रातर्होलिकाभूमिर्विभूतिंचवंदयेत्॥तथाचचूतकसुमप्राशनंकुर्यात्॥इ-
तिफाल्गुणः॥अथचैत्रकृष्णाष्टम्यांज्ञानक्योत्पत्तिः॥ राघवेंद्रेणयतिनाहृष्ट्वाग्रंथान्पुरात

नान्॥ कृतोयंनिर्णयोद्धारोविशेषतिथिनिर्णयः॥ इति राघवेंद्रतीर्थविरचित निर्णयोद्धारः समाप्तिमगमत्॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥ ॥ छ॥ ॥ छ ॥ ॥ छ ॥

ई पुस्तकवु बेळगांवियल्ली भिकाजी हरी सामंत इवरु तंम बेळगांवसमाचार छापस्तानेयल्ली छापिसी प्रसिद्ध माडिदरु.

शके १८०३

आत्तदक ई श्रीनिवासय्यंद पुस्तक

॥ इति श्रीराघवेंद्रतीर्थकृत तिथिनिर्णय समाप्तः ॥